শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে ষটসপ্ততিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে ষটসপ্ততিতমং দশকম্॥

## উদ্ধৱদূত্যৱর্ণনম্

গৎৱা সান্দীপনিমথ চতুষ্ষষ্টিমাত্রৈরহোভিঃ
সর্ৱজ্ঞস্ত্ৱং সহ মুসলিনা সর্ৱৱিদ্যা গৃহীৎৱা।
পুত্রং নষ্টং যমনিলযনাদাহৃতং দক্ষিণার্থং
দৎৱা তস্মৈ নিজপুরমগা নাদযন্ পাঞ্চজন্যম্॥ **76.1** ॥

স্মৃৎৱা স্মৃৎৱা পশুপসুদৃশঃ প্রেমভারপ্রণুন্নাঃ
কারুণ্যেন ৎৱমপি ৱিৱশঃ প্রাহিণোরুদ্ধৱং তম্।
কিঞ্চামুষ্মৈ পরমসুহৃদে ভক্তৱর্যায তাসাং
ভক্ত্যুদ্রেকং সকলভুৱনে দুর্লভং দর্শযিষ্যন্॥ **76.2** ॥

ৎৱন্মাহাত্ম্যপ্রথিমপিশুনং গোকুলং প্রাপ্য সাযং
ৎৱদ্বার্তাভির্বহু স রমযামাস নন্দং যশোদাম্।
প্রাতর্দৃষ্টৱা মণিমযরথং শঙ্কিতাঃ পঙ্কজাক্ষ্যঃ
শ্রুৎৱা প্রাপ্তং ভৱদনুচরং ত্যক্তকার্যাঃ সমীযুঃ॥ **76.3** ॥

দৃষ্টৱা চৈনং ৎৱদুপমলসদ্বেষভূষাভিরামং
স্মৃৎৱা স্মৃৎৱা তৱ ৱিলসিতান্যুচ্চকৈস্তানি তানি।
রুদ্ধালাপাঃ কথমপি পুনর্গদ্গদাং ৱাচমূচুঃ
সৌজন্যাদীন্ নিজপরভিদামপ্যলং ৱিস্মরন্ত্যঃ॥ **76.4** ॥

শ্রীমন্ কিং ৎৱং পিতৃজনকৃতে প্রেষিতো নির্দযেন
ক্বাসৌ কান্তো নগরসুদৃশাং হা হরে নাথ পাযাঃ।

আশ্লেষাণামমৃতৱপুষো হন্ত তে চুম্বনানা -
মুন্মাদানাং কুহকৱচসাং ৱিস্মরেৎ কান্ত কা ৱা॥ **76.5**॥

রাসক্রীডালুলিতললিতং ৱিশ্লথৎকেশপাশং
মন্দোদ্ভিন্নশ্রমজলকণং লোভনীযং ৎৱদঙ্গম্।
কারুণ্যাব্ধে সকৃদপি সমালিঙ্গিতুং দর্শযেতি
প্রেমোন্মাদাদ্ভুৱনমদন ৎৱৎপ্রিযাস্ত্বাং ৱিলেপুঃ॥ **76.6**॥

এৱম্প্রাযৈর্ৱিৱশৱচনৈরাকুলা গোপিকাস্তা -
স্ত্বৎসন্দেশৈঃ প্রকৃতিমনযৎ সোঽথ ৱিজ্ঞানগর্ভৈঃ।
ভূযস্তাভির্মুদিতমতিভিস্ত্বন্মযীভির্ৱধূভি -
স্তত্তদ্বার্তাসরসমনযৎ কানিচিদ্বাসরাণি॥ **76.7**॥

ৎৱৎপ্রোদ্গানৈঃ সহিতমনিশং সর্ৱতো গেহকৃত্যং
ৎৱদ্বার্তৈৱ প্রসরতি মিথঃ সৈৱ চোৎস্বাপলাপাঃ।
চেষ্টাঃ প্রাযস্ত্বদনুকৃতযস্ত্বন্মযং সর্ৱমেৱং
দৃষ্টৱা তত্র ৱ্যমুহদধিকং ৱিস্মযাদুদ্ধৱোঽযম্॥ **76.8**॥

রাধাযা মে প্রিযতমমিদং মৎপ্রিযৈৱং ব্রৱীতি
ৎৱং কিং মৌনং কলযসি সখে মানিনী মৎপ্রিযেৱ।
ইত্যাদ্যেৱ প্রৱদতি সখি ৎৱৎপ্রিযো নির্জনে মা -
মিত্থংৱাদৈররমযদযং ৎৱৎপ্রিযামুৎপলাক্ষীম্॥ **76.9**॥

এষ্যামি দ্রাগনুপগমনং কেৱলং কার্যভারা -
দ্বিশ্লেষেঽপি স্মরণদৃঢতাসম্ভৱান্মাস্তু খেদঃ।
ব্রহ্মানন্দে মিলতি নচিরাৎ সঙ্গমো ৱা ৱিযোগ -
স্তুল্যো ৱঃ স্যাদিতি তৱ গিরা সোঽকরোন্নির্ৱ্যথাস্তাঃ॥ **76.10**॥

এৱং ভক্তিঃ সকলভুৱনে নেক্ষিতা ন শ্রুতা ৱা
কিং শাস্ত্রৌঘৈঃ কিমিহ তপসা গোপিকাভ্যো নমোঽস্তু।

ইত্যানন্দাকুলমুপগতং গোকুলাদুদ্ধৱং তং
দৃষ্টৱা হৃষ্টো গুরুপুরপতে পাহি মামামযৌঘাৎ॥ **76.11** ॥

॥ ইতি শ্রীমন্নারাযণীযে ষটসপ্ততিতমং দশকং সমাপ্তম্ ॥